# Utathya Gita

# ઉતથ્યગીતા

## Document Information

Text title : utathyagItA from Mahabharata Shantiparva 90-91

File name : utathyagiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Proofread by : Sunder Hattangadi

Description-comments : (mahAbhArata shAntiparva Rajadharma, chapters 90-91)

Acknowledge-Permission: Professor Tokunaga

Latest update : December 30, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 30, 2022

*sanskritdocuments.org*

# ઉતથ્યગીતા

મહાભારતે શાન્તિપર્વાન્તર્ગતા ।

## અધ્યાયઃ ૯૦

યાનઙ્ગિરાઃ ક્ષત્રધર્માનુતથ્યો બ્રહ્મવિત્તમઃ ।
માન્ધાત્રે યૌવનાશ્વાય પ્રીતિમાનભ્યભાષત ॥ ૧॥

સ યથાનુશશાસૈનમુતથ્યો બ્રહ્મવિત્તમઃ ।
તત્તે સર્વં પ્રવક્ષ્યામિ નિખિલેન યુધિષ્ઠિર ॥ ૨॥

ધર્માય રાજા ભવતિ ન કામકરણાય તુ ।
માન્ધાતરેવં જાનીહિ રાજા લોકસ્ય રક્ષિતા ॥ ૩॥

રાજા ચરતિ વૈ ધર્મં દેવત્વાયૈવ ગચ્છતિ ।
ન ચેદ્ધર્મં સ ચરતિ નરકાયૈવ ગચ્છતિ ॥ ૪॥

ધર્મે તિષ્ઠન્તિ ભૂતાનિ ધર્મો રાજનિ તિષ્ઠતિ ।
તં રાજા સાધુ યઃ શાસ્તિ સ રાજા પૃથિવીપતિઃ ॥ ૫॥

રાજાપરાધાન્માન્ધાતર્લક્ષ્મીવાન્પાપ ઉચ્યતે ।
દેવાશ્ચ ગર્હાં ગચ્છન્તિ ધર્મો નાસ્તીતિ ચોચ્યતે ॥ ૬॥

અધર્મે વર્તમાનાનામર્થસિદ્ધિઃ પ્રદૃશ્યતે ।
તદેવ મઙ્ગલં સર્વં લોકઃ સમનુવર્તતે ॥ ૭॥

ઉચ્છિદ્યતે ધર્મવૃત્તમધર્મો વર્તતે મહાન્ ।
ભયમાહુર્દિવારાત્રં યદા પાપો ન વાર્યતે ॥ ૮॥

ન વેદાનનુવર્તન્તિ વ્રતવન્તો દ્વિજાતયઃ ।
ન યજ્ઞાંસ્તન્વતે વિપ્રા યદા પાપો ન વાર્યતે ॥ ૯॥

વધ્યાનામિવ સર્વેષાં મનો ભવતિ વિહ્વલમ્ ।

મનુષ્યાણાં મહારાજ યદા પાપો ન વાર્યતે ॥ ૧૦॥

ઉભૌ લોકાવભિપ્રેક્ષ્ય રાજાનમૃષયઃ સ્વયમ્ ।
અસૃજન્સુમહદ્ભૂતમયં ધર્મો ભવિષ્યતિ ॥ ૧૧॥

યસ્મિન્ધર્મો વિરાજેત તં રાજાનં પ્રચક્ષતે ।
યસ્મિન્વિલીયતે ધર્મં તં દેવા વૃષલં વિદુઃ ॥ ૧૨॥

વૃષો હિ ભગવાન્ધર્મો યસ્તસ્ય કુરુતે લયમ્ ।
વૃષલં તં વિદુર્દેવાસ્તસ્માદ્ધર્મં ન લોપયેત્ ॥ ૧૩॥

ધર્મે વર્ધતિ વર્ધન્તિ સર્વભૂતાનિ સર્વદા ।
તસ્મિન્હ્રસતિ હીયન્તે તસ્માદ્ધર્મં પ્રવર્ધયેત્ ॥ ૧૪॥

ધનાત્સ્રવતિ ધર્મો હિ ધારણાદ્વેતિ નિશ્ચયઃ ।
અકાર્યાણાં મનુષ્યેન્દ્ર સ સીમાન્તકરઃ સ્મૃતઃ ॥ ૧૫॥

પ્રભવાર્થં હિ ભૂતાનાં ધર્મઃ સૃષ્ટઃ સ્વયમ્ભુવા ।
તસ્માત્પ્રવર્ધયેદ્ધર્મં પ્રજાનુગ્રહકારણાત્ ॥ ૧૬॥

તસ્માદ્ધિ રાજશાર્દૂલ ધર્મઃ શ્રેષ્ઠ ઇતિ સ્મૃતઃ ।
સ રાજા યઃ પ્રજાઃ શાસ્તિ સાધુકૃત્પુરુષર્ષભઃ ॥ ૧૭॥

કામક્રોધાવનાદૃત્ય ધર્મમેવાનુપાલયેત્ ।
ધર્મઃ શ્રેયસ્કરતમો રાજ્ઞાં ભરતસત્તમ ॥ ૧૮॥

ધર્મસ્ય બ્રાહ્મણા યોનિસ્તસ્માત્તાન્પૂજયેત્સદા ।
બ્રાહ્મણાનાં ચ માન્ધાતઃ કુર્યાત્કામાનમત્સરી ॥ ૧૯॥

તેષાં હ્યકામકરણાદ્રાજ્ઞઃ સઞ્જાયતે ભયમ્ ।
મિત્રાણિ ચ ન વર્ધન્તે તથામિત્રી ભવન્ત્યપિ ॥ ૨૦॥

બ્રાહ્મણાન્વૈ સદાસૂયન્બાલ્યાદ્વૈરોચનો બલિઃ ।
અથાસ્માચ્છ્રીરપાક્રામદ્યાસ્મિન્નાસીત્પ્રતાપિની ॥ ૨૧॥

તતસ્તસ્માદપાક્રમ્ય સાગચ્છત્પાકશાસનમ્ ।
અથ સોઽન્વતપત્પશ્ચાચ્છ્રિયં દૃષ્ટ્વા પુરન્દરે ॥ ૨૨॥

એતત્ફલમસૂયાયા અભિમાનસ્ય ચાભિ ભોઃ ।
તસ્માદ્બુધ્યસ્વ માન્ધાતર્મા ત્વાં જહ્યાત્પ્રતાપિની ॥ ૨૩॥

દર્પો નામ શ્રિયઃ પુત્રો જજ્ઞેઽધર્માદિતિ શ્રુતિઃ ।
તેન દેવાસુરા રાજન્નીતાઃ સુબહુશો વશમ્ ॥ ૨૪॥

રાજર્ષયશ્ચ બહવસ્તસ્માદ્બુધ્યસ્વ પાર્થિવ ।
રાજા ભવતિ તં જિત્વા દાસસ્તેન પરાજિતઃ ॥ ૨૫॥

સ યથા દર્પસહિતમધર્મં નાનુસેવતે ।
તથા વર્તસ્વ માન્ધાતશ્ચિરં ચેત્સ્થાતુમિચ્છસિ ॥ ૨૬॥

મત્તાત્પ્રમત્તાત્પૌગણ્ડાદુન્મત્તાચ્ચ વિશેષતઃ ।
તદભ્યાસાદુપાવર્તેદહિતાનાં ચ સેવનાત્ ॥ ૨૭॥

નિગૃહીતાદમાત્યાચ્ચ સ્ત્રીભ્યશ્ચૈવ વિશેષતઃ ।
પર્વતાદ્વિષમાદ્દુર્ગાદ્ધસ્તિનોઽશ્વાત્સરીસૃપાત્ ॥ ૨૮॥

એતેભ્યો નિત્યયત્તઃ સ્યાન્નક્તઞ્ચર્યાં ચ વર્જયેત્ ।
અત્યાશાં ચાભિમાનં ચ દમ્ભં ક્રોધં ચ વર્જયેત્ ॥ ૨૯॥

અવિજ્ઞાતાસુ ચ સ્ત્રીષુ ક્લીબાસુ સ્વૈરિણીષુ ચ ।
પરભાર્યાસુ કન્યાસુ નાચરેન્મૈથુનં નૃપઃ ॥ ૩૦॥

કુલેષુ પાપરક્ષાંસિ જાયન્તે વર્ણસઙ્કરાત્ ।
અપુમાંસોઽઙ્ગહીનાશ્ચ સ્થૂલજિહ્વા વિચેતસઃ ॥ ૩૧॥

એતે ચાન્યે ચ જાયન્તે યદા રાજા પ્રમાદ્યતિ ।
તસ્માદ્રાજ્ઞા વિશેષેણ વર્તિતવ્યં પ્રજાહિતે ॥ ૩૨॥

ક્ષત્રિયસ્ય પ્રમત્તસ્ય દોષઃ સઞ્જાયતે મહાન્ ।
અધર્માઃ સમ્પ્રવર્તન્તે પ્રજાસઙ્કરકારકાઃ ॥ ૩૩॥

અશીતે વિદ્યતે શીતં શીતે શીતં ન વિદ્યતે ।
અવૃષ્ટિરતિવૃષ્ટિશ્ચ વ્યાધિશ્ચાવિશતિ પ્રજાઃ ॥ ૩૪॥

નક્ષત્રાણ્યુપતિષ્ઠન્તિ ગ્રહા ઘોરાસ્તથાપરે ।
ઉત્પાતાશ્ચાત્ર દૃશ્યન્તે બહવો રાજનાશનાઃ ॥ ૩૫॥

અરક્ષિતાત્મા યો રાજા પ્રજાશ્ચાપિ ન રક્ષતિ ।
પ્રજાશ્ચ તસ્ય ક્ષીયન્તે તતઃ સોઽનુવિનશ્યતિ ॥ ૩૬॥

દ્વાવાદદાતે હ્યેકસ્ય દ્વયોશ્ચ બહવોઽપરે ।
કુમાર્યઃ સમ્પ્રલુપ્યન્તે તદાહુર્નૃપ દૂષણમ્ ॥ ૩૭॥

મમૈતદિતિ નૈકસ્ય મનુષ્યેષ્વવતિષ્ઠતે ।
ત્યક્ત્વા ધર્મં યદા રાજા પ્રમાદમનુતિષ્ઠતિ ॥ ૩૮॥

ઇતિ શ્રીમહાભરતે શાન્તિપર્વણિ રાજધર્માનુશાસનપર્વણિ
ઉતથ્યગીતાસુ નવતિતમોઽધ્યાયઃ । ૯૦

## અધ્યાયઃ ૯૧

કાલવર્ષી ચ પર્જન્યો ધર્મચારી ચ પાર્થિવઃ ।
સમ્પદ્યદેષા ભવતિ સા બિભર્તિ સુખં પ્રજાઃ ॥ ૧॥

યો ન જાનાતિ નિર્હર્તું વસ્ત્રાણાં રજકો મલમ્ ।
રત્નાનિ વા શોધયિતું યથા નાસ્તિ તથૈવ સઃ ॥ ૨॥

એવમેવ દ્વિજેન્દ્રાણાં ક્ષત્રિયાણાં વિશામપિ ।
શૂદ્રશ્ચતુર્થો વર્ણાનાં નાનાકર્મસ્વવસ્થિતાઃ ॥ ૩॥

કર્મ શૂદ્રે કૃષિર્વૈશ્યે દણ્ડનીતિશ્ચ રાજનિ ।
બ્રહ્મચર્યં તપો મન્ત્રાઃ સત્યં ચાપિ દ્વિજાતિષુ ॥ ૪॥

તેષાં યઃ ક્ષત્રિયો વેદ વસ્ત્રાણામિવ શોધનમ્ ।
શીલદોષાન્વિનિર્હર્તું સ પિતા સ પ્રજાપતિઃ ॥ ૫॥

કૃતં ત્રેતા દ્વાપરશ્ચ કલિશ્ચ ભરતર્ષભ ।
રાજવૃત્તાનિ સર્વાણિ રાજૈવ યુગમુચ્યતે ॥ ૬॥

ચાતુર્વર્ણ્યં તથા વેદાશ્ચાતુરાશ્રમ્યમેવ ચ ।
સર્વં પ્રમુહ્યતે હ્યેતદ્યદા રાજા પ્રમાદ્યતિ ॥ ૭॥

રાજૈવ કર્તા ભૂતાનાં રાજૈવ ચ વિનાશકઃ ।
ધર્માત્મા યઃ સ કર્તા સ્યાદધર્માત્મા વિનાશકઃ ॥ ૮॥

રાજ્ઞો ભાર્યાશ્ચ પુત્રાશ્ચ બાન્ધવાઃ સુહૃદસ્તથા ।
સમેત્ય સર્વે શોચન્તિ યદા રાજા પ્રમાદ્યતિ ॥ ૯॥

હસ્તિનોઽશ્વાશ્ચ ગાવશ્ચાપ્યુષ્ટ્રાશ્વતરગર્દભાઃ ।
અધર્મવૃત્તે નૃપતૌ સર્વે સીદન્તિ પાર્થિવ ॥ ૧૦॥

દુર્બલાર્થં બલં સૃષ્ટં ધાત્રા માન્ધાતરુચ્યતે ।

અબલં તન્મહદ્ભૂતં યસ્મિન્સર્વં પ્રતિષ્ઠિતમ્ ॥ ૧૧॥

યચ્ચ ભૂતં સ ભજતે ભૂતા યે ચ તદન્વયાઃ ।
અધર્મસ્થે હિ નૃપતૌ સર્વે સીદન્તિ પાર્થિવ ॥ ૧૨॥

દુર્બલસ્ય હિ યચ્ચક્ષુર્મુનેરાશીવિષસ્ય ચ ।
અવિષહ્યતમં મન્યે મા સ્મ દુર્બલમાસદઃ ॥ ૧૩॥

દુર્બલાંસ્તાત બુધ્યેથા નિત્યમેવાવિમાનિતાન્ ।
મા ત્વાં દુર્બલચક્ષૂંષિ પ્રદહેયુઃ સબાન્ધવમ્ ॥ ૧૪॥

ન હિ દુર્બલદગ્ધસ્ય કુલે કિઞ્ચિત્પ્રરોહતિ ।
આમૂલં નિર્દહત્યેવ મા સ્મ દુર્બલમાસદઃ ॥ ૧૫॥

અબલં વૈ બલાચ્છ્રેયો યચ્ચાતિબલવદ્બલમ્ ।
બલસ્યાબલદગ્ધસ્ય ન કિઞ્ચિદવશિષ્યતે ॥ ૧૬॥

વિમાનિતો હતોત્ક્રુષ્ટસ્ત્રાતારં ચેન્ન વિન્દતિ ।
અમાનુષકૃતસ્તત્ર દણ્ડો હન્તિ નરાધિપમ્ ॥ ૧૭॥

મા સ્મ તાત બલસ્થસ્ત્વં બાધિષ્ઠા માપિ દુર્બલમ્ ।
મા ત્વાં દુર્બલચક્ષૂંષિ ધક્ષ્યન્ત્યગ્નિરિવાશ્રયમ્ ॥ ૧૮॥

યાનિ મિથ્યાભિશસ્તાનાં પતન્ત્યશ્રૂણિ રોદતામ્ ।
તાનિ પુત્રાન્પશૂન્ઘ્નન્તિ તેષાં મિથ્યાભિશંસતામ્ ॥ ૧૯॥

યદિ નાત્મનિ પુત્રેષુ ન ચેત્પૌત્રેષુ નપ્તૃષુ ।
ન હિ પાપં કૃતં કર્મ સદ્યઃ ફલતિ ગૌરિવ ॥ ૨૦॥

યત્રાબલો વધ્યમાનસ્ત્રાતારં નાધિગચ્છતિ ।
મહાન્દૈવકૃતસ્તત્ર દણ્ડઃ પતતિ દારુણઃ ॥ ૨૧॥

યુક્તા યદા જાનપદા ભિક્ષન્તે બ્રાહ્મણા ઇવ ।
અભીક્ષ્ણં ભિક્ષુદોષેણ રાજાનં ઘ્નન્તિ તાદૃશાઃ ॥ ૨૨॥

રાજ્ઞો યદા જનપદે બહવો રાજપૂરુષાઃ ।
અનયેનોપવર્તન્તે તદ્રાજ્ઞઃ કિલ્બિષં મહત્ ॥ ૨૩॥

યદા યુક્તા નયન્ત્યર્થાન્કામાદર્થવશેન વા ।
કૃપણં યાચમાનાનાં તદ્રાજ્ઞો વૈશસં મહત્ ॥ ૨૪॥

મહાવૃક્ષો જાયતે વર્ધતે ચ
    તં ચૈવ ભૂતાનિ સમાશ્રયન્તિ ।
યદા વૃક્ષશ્છિદ્યતે દહ્યતે વા
    તદાશ્રયા અનિકેતા ભવન્તિ ॥ ૨૫॥

યદા રાષ્ટ્રે ધર્મમગ્ર્યં ચરન્તિ
    સંસ્કારં વા રાજગુણં બ્રુવાણાઃ ।
તૈરેવાધર્મશ્ચરિતો ધર્મમોહાત્
    તૂર્ણં જહ્યાત્સુકૃતં દુષ્કૃતં ચ ॥ ૨૬॥

યત્ર પાપા જ્યાયમાનાશ્ચરન્તિ
    સતાં કલિર્વિન્દતિ તત્ર રાજ્ઞઃ ।
યદા રાજા શાસ્તિ નરાન્ન શક્ત્યા
    ન તદ્રાજ્યં વર્ધતે ભૂમિપાલ ॥ ૨૭॥

યશ્ચામાત્યં માનયિત્વા યથાર્હં
    મન્ત્રે ચ યુદ્ધે ચ નૃપો નિયુઞ્જ્યાત્ ।
પ્રવર્ધતે તસ્ય રાષ્ટ્રં નૃપસ્ય
    ભુઙ્ક્તે મહીં ચાપ્યખિલાં ચિરાય ॥ ૨૮॥

અત્રાપિ સુકૃતં કર્મ વાચં ચૈવ સુભાષિતામ્ ।
સમીક્ષ્ય પૂજયન્રાજા ધર્મં પ્રાપ્નોત્યનુત્તમમ્ ॥ ૨૯॥

સંવિભજ્ય યદા ભુઙ્ક્તે ન ચાન્યાનવમન્યતે ।
નિહન્તિ બલિનં દૃપ્તં સ રાજ્ઞો ધર્મ ઉચ્યતે ॥ ૩૦॥

ત્રાયતે હિ યદા સર્વં વાચા કાયેન કર્મણા ।
પુત્રસ્યાપિ ન મૃષ્યેચ્ચ સ રાજ્ઞો ધર્મ ઉચ્યતે ॥ ૩૧॥

યદા શારણિકાન્રાજા પુત્રવત્પરિરક્ષતિ ।
ભિનત્તિ ન ચ મર્યાદાં સ રાજ્ઞો ધર્મ ઉચ્યતે ॥ ૩૨॥

યદાઽઽપ્તદક્ષિણૈર્યજ્ઞૈર્યજતે શ્રદ્ધયાન્વિતઃ ।
કામદ્વેષાવનાદૃત્ય સ રાજ્ઞો ધર્મ ઉચ્યતે ॥ ૩૩॥

કૃપણાનાથવૃદ્ધાનાં યદાશ્રુ વ્યપમાર્ષ્ટિ વૈ ।
હર્ષં સઞ્જનયન્નૃણાં સ રાજ્ઞો ધર્મ ઉચ્યતે ॥ ૩૪॥

વિવર્ધયતિ મિત્રાણિ તથારીંશ્ચાપકર્ષતિ ।

સમ્પૂજયતિ સાધૂંશ્ચ સ રાજ્ઞો ધર્મ ઉચ્યતે ॥ ૩૫॥

સત્યં પાલયતિ પ્રાપ્ત્યા નિત્યં ભૂમિં પ્રયચ્છતિ ।
પૂજયત્યતિથીન્ભૃત્યાન્સ રાજ્ઞો ધર્મ ઉચ્યતે ॥ ૩૬॥

નિગ્રહાનુગ્રહૌ ચોભૌ યત્ર સ્યાતાં પ્રતિષ્ઠિતૌ ।
અસ્મિઁલ્લોકે પરે ચૈવ રાજા તત્પ્રાપ્નુતે ફલમ્ ॥ ૩૭॥

યમો રાજા ધાર્મિકાણાં માન્ધાતઃ પરમેશ્વરઃ ।
સંયચ્છન્ભવતિ પ્રાણાન્ન સંયચ્છંસ્તુ પાવકઃ ॥ ૩૮॥

ઋત્વિક્પુરોહિતાચાર્યાન્સત્કૃત્યાનનવમત્ય ચ ।
યદા સમ્યક્પ્રગૃહ્ણાતિ સ રાજ્ઞો ધર્મ ઉચ્યતે ॥ ૩૯॥

યમો યચ્છતિ ભૂતાનિ સર્વાણ્યેવાવિશેષતઃ ।
તથા રાજ્ઞાનુકર્તવ્યં યન્તવ્યા વિધિવત્પ્રજાઃ ॥ ૪૦॥

સહસ્રાક્ષેણ રાજા હિ સર્વથૈવોપમીયતે ।
સ પશ્યતિ હિ યં ધર્મં સ ધર્મઃ પુરુષર્ષભ ॥ ૪૧॥

અપ્રમાદેન શિક્ષેથાઃ ક્ષમાં બુદ્ધિં ધૃતિં મતિમ્ ।
ભૂતાનાં સત્ત્વજિજ્ઞાસા સાધ્વસાધુ ચ સર્વદા ॥ ૪૨॥

સઙ્ગ્રહઃ સર્વભૂતાનાં દાનં ચ મધુરા ચ વાક્ ।
પૌરજાનપદાશ્ચૈવ ગોપ્તવ્યાઃ સ્વા યથા પ્રજાઃ ॥ ૪૩॥

ન જાત્વદક્ષો નૃપતિઃ પ્રજાઃ શક્નોતિ રક્ષિતુમ્ ।
ભારો હિ સુમહાંસ્તાત રાજ્યં નામ સુદુષ્કરમ્ ॥ ૪૪॥

તદ્દણ્ડવિન્નૃપઃ પ્રાજ્ઞઃ શૂરઃ શક્નોતિ રક્ષિતુમ્ ।
ન હિ શક્યમદણ્ડેન ક્લીબેનાબુદ્ધિનાપિ વા ॥ ૪૫॥

અભિરૂપૈઃ કુલે જાતૈર્દક્ષૈર્ભક્તૈર્બહુશ્રુતૈઃ ।
સર્વા બુદ્ધીઃ પરીક્ષેથાસ્તાપસાશ્રમિણામપિ ॥ ૪૬॥

તતસ્ત્વં સર્વભૂતાનાં ધર્મં વેત્સ્યસિ વૈ પરમ્ ।
સ્વદેશે પરદેશે વા ન તે ધર્મો વિનશ્યતિ ॥ ૪૭॥

ધર્મે ચાર્થે ચ કામે ચ ધર્મ એવોત્તરો ભવેત્ ।
અસ્મિઁલ્લોકે પરે ચૈવ ધર્મવિત્સુખમેધતે ॥ ૪૮॥

ત્યજન્તિ દારાન્પ્રાણાંશ્ચ મનુષ્યાઃ પ્રતિપૂજિતાઃ ।
સઙ્ગ્રહશ્ચૈવ ભૂતાનાં દાનં ચ મધુરા ચ વાક્ ॥ ૪૯॥

અપ્રમાદશ્ચ શૌચં ચ તાત ભૂતિકરં મહત્ ।
એતેભ્યશ્ચૈવ માન્ધાતઃ સતતં મા પ્રમાદિથાઃ ॥ ૫૦॥

અપ્રમત્તો ભવેદ્રાજા છિદ્રદર્શી પરાત્મનોઃ ।
નાસ્ય છિદ્રં પરઃ પશ્યેચ્છિદ્રેષુ પરમન્વિયાત્ ॥ ૫૧॥

એતદ્વૃત્તં વાસવસ્ય યમસ્ય વરુણસ્ય ચ ।
રાજર્ષીણાં ચ સર્વેષાં તત્ત્વમપ્યનુપાલય ॥ ૫૨॥

તત્કુરુષ્વ મહારાજ વૃત્તં રાજર્ષિસેવિતમ્ ।
આતિષ્ઠ દિવ્યં પન્થાનમહ્નાય ભરતર્ષભ ॥ ૫૩॥

ધર્મવૃત્તં હિ રાજાનં પ્રેત્ય ચેહ ચ ભારત ।
દેવર્ષિપિતૃગન્ધર્વાઃ કીર્તયન્ત્યમિતૌજસઃ ॥ ૫૪॥

સ એવમુક્તો માન્ધાતા તેનોતથ્યેન ભારત ।
કૃતવાનવિશઙ્કસ્તદેકઃ પ્રાપ ચ મેદિનીમ્ ॥ ૫૫॥

ભવાનપિ તથા સમ્યઙ્માન્ધાતેવ મહીપતે ।
ધર્મં કૃત્વા મહીં રક્ષન્સ્વર્ગે સ્થાનમવાપ્સ્યસિ ॥ ૫૬॥

ઇતિ શ્રીમહાભરતે શાન્તિપર્વણિ રાજધર્માનુશાસનપર્વણિ
વામદેવગીતાસુ એકનવતિતમોઽધ્યાયઃ । ૯૧
॥ ઇતિ ઉતથ્યગીતા સમાપ્તા ॥

Adhyaya numbers 91-92 in shAntiparva,
Mahabharata critical edition
(Bhandarkar Oriental Research Institute BORI).
In Kinjavadekar's edition they are 90-91.

Encoded by Sunder Hattangadi
Proofread by Sunder Hattangadi, PSA Easwaran

*Utathya Gita*

pdf was typeset on December 30, 2022

Please send corrections to *sanskrit@cheerful.com*